শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী হনুমদষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী হনুমদষ্টকম্ ॥

অঞ্জনাশুভাঙ্গজাতমিন্দুনন্দনন্দনং
মঞ্জুভাষসাধুপুঞ্জরঞ্জনং নিরঞ্জনম্।
কুঞ্জরাদিপুঞ্জশক্তিমঞ্জসাঽহমাশ্রযে
মঞ্জুলং প্রভঞ্জনাত্মজং হনূমদাহ্ৱযম্॥ **1** ॥

তুঙ্গশৃঙ্গমাখিলাঙ্গসঙ্গিগাঙ্গমঙ্গলো -
ত্তুঙ্গভঙ্গভঙ্গদে লসন্নিৱৃত্তিসঙ্গমে।
সঙ্গতং সুপিঙ্গনেত্রসপ্লৱঙ্গপুঙ্গৱং
মঙ্গলাঙ্গনং হনূমদাখ্যমেমি সঙ্গতিম্॥ **2** ॥

সৎৱৱৎৱভৃত্যসত্যনিত্যভীষ্টদং গুরুং
মর্ত্যনূনকীর্ত্যমানসত্যরামভৃত্যকম্।
স্তুত্যকৃত্যমত্যপূর্ৱসত্যমত্যলঙ্কৃতং
নিত্যকাহনূমদাখ্যমেমি দৈত্যহন্তকম্॥ **3** ॥

শ্যামধামরামকামসার্ৱভৌমসম্মতং
পামরামরাশ্রিতস্য কামদামরীদ্রুমম্।
হেমধামপুণ্যনামতামসাক্ষিভীমকং
নৌমি তং হনূমদাখ্যমেমি পাপশামকম্॥ **4** ॥

বালভালভানুকান্তমল্পকান্তিমালিনং
লীলযাত্তশৈলমল্পতূলৱৎসুকোমলম্।
কোসলাধিপালদত্তমালযাতিশালিনং
কেৱলং হনূমদাখ্যমেমি দেৱমৌলিকম্॥ **5** ॥

কুণ্ডলাদিমণ্ডিতেন্দুমণ্ডলাভতুণ্ডকো -
দণ্ডরামরম্যভাণ্ডভূতচিত্তমণ্ডনম্।
চণ্ডপণ্ডিতং হনূমদাখ্যমেমি সন্ততং
খণ্ডলারিমণ্ডলাতিখণ্ডনাদিশৌণ্ডকম্॥ **6**॥

ৱন্দনীযসুন্দরারৱিন্দতুল্যপাদকং
মন্দহাসকুন্দদন্তমিন্দিরেশনন্দকম্।
ইন্দ্র ৱীন্দ্র চন্দ্র পূর্ৱৃন্দৱন্দ্যসচ্চিদা -
নন্দসান্দ্রকং হনূমদাখ্যমাশ্রযেতরাম্॥ **7**॥

ক্ষারভূরিৱারিরাশিসাগরান্তদ্ৱীপগা -
পারমেযরামদারচোরহৃৎসুদারকম্।
দারিতারিৱানরাৱতারকং নিজং গুরুং
দারিতাঘকং হনূমদাখ্যমাস্মরাম্যহম্॥ **8**॥

ইত্যশেষৱীশশেষকেশৱাসৱাদিভিঃ
স্তূযমানসদ্গুণৌঘসদ্ধনূমদষ্টকম্।
সন্নিৱৃত্তিসঙ্গমে সুগীতমাত্মমুক্তযে
প্রীতিমেতু তেন ভূতিদঃ সদা রমাপতিঃ॥ **9**॥

॥ শ্রী হনুমদষ্টকং সমাপ্তম্॥